QP CODE

C1097

Enrollment Number: ……

Name: ……

BA DEGREE EXAMINATIONS, AUGUST 2025
Sixth Semester
B.A. Sanskrit Language and Literature
B21SN06DC - सन्देशकाव्यं गद्यकाव्यं च
(2022 admissions)

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।
(Answers should be written in Sanskrit using Devanagari script)

Time: 3 Hours **Max Marks: 70**

Section A

एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानाम् उत्तराणि लिखत।

1. उपमाप्रयोगे प्रथितः कविः कः?
2. मेघसन्देशस्य नायकः कः?
3. यक्षः कुत्र अवसत्?
4. वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श । कं ददर्श ?
5. ब्रह्मावर्तं नाम जनपदं केन निर्मितं भवति ?
6. सारङ्गाः सूचयिष्यन्ति मार्गम् । कस्मै ?
7. व्योमगङ्गाजलार्द्रैः पुष्पसारैः स्नपयतु । कम् ?
8. आत्मबिम्बं पात्रीकुर्वन् व्रज । कस्येदं वचनम् ?
9. अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः। कदा ?
10. शैलराजावतीर्णा सगरतनयस्वर्गसोपाना नदी का?
11. महेश्वरस्य पादविन्यासं व्यक्तं भवति । कुत्र ?
12. जगत्सर्वम् कस्य उच्छिष्टम् इति प्रसिद्धम् ?
13. कादम्बरीसंग्रहस्य कर्ता कः?
14. शूद्रकस्य राजधान्याः नामधेयं किम्?
15. राजा शूद्रकः अन्तःपुरात् वैशम्पायनमानेतुं निर्दिदेश । काम्?

(1X10=10)

Section B

एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।

16. मेघसन्देशे कति भागाः सन्ति? नाम वदत ।
17. कान्ताविरही स यक्ष: मेघं दृष्ट्वा किमकरोत्?
18. मेघ: कस्मिन् वंशे जात :? तस्य स्वरूपं किम् ?
19. संतप्तानां शरणमसि । कः? यक्षस्य संतापस्य कारणं किम्?
20. मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या:। कस्येदं वचनम् ? कं प्रति अवदत्?
21. प्रकृतिसुभग: ते छायात्माऽपि प्रवेशं लप्स्यते । काम् ? कीदृशम्?
22. नाभिगन्धै: सुरभिला:शिला: सन्ति। कुत्र ? केषा म्?
23. बाणभट्टस्य कृतयः काः?
24. द्वारे काचन चण्डालकन्यका दक्षिणदेशादागता । कस्य वचनमिदम् ? कं प्रति अवदत्?
25. शूद्रकमहाराज: विस्मित: बभूव। कदा?

(2X5=10)

Section C

एकखण्डिकया केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत ।

26. कण्ठाश्लेषप्रणयिनि जने किं पुर्नदूरसंस्थे । व्याख्यात ।
27. याच्ञा मोघा वरमधिगुणे नाधमे लाब्धकामा:। सन्दर्भं लिखत ।
28. सम्पत्स्यन्ते नभसि भवतो राजहंसा सहाया:। व्याख्यात ।
29. आम्रकूटपर्वतं वर्णयत ।
30. पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम्। विशदयत ।
31. हिमालयदेशं वर्णयता।
32. कैलासदेशस्य माहात्म्यं लिखत ।
33. बाणभट्टस्य कृती:अधिकृत्य लघुटिप्पणिं लिखत ।
34. शूद्रकराजस्य गुणान् वर्णयत ।
35. मातङ्गकुमारीप्रवेशं लिखत ।
36. शूद्रकस्य विस्मयं वर्णयत ।
37. शूद्रकस्य आस्थानमण्डपमधिकृत्य लघुटिप्पणिं लिखत ।.

(5X6=30)

QP CODE
C1097

Section D

पुटैकेन द्वाभ्यां वा केषाञ्चित् द्वयोः प्रश्नयोः उत्तराणि लिखत।

38. रामगिर्याश्रमादार भ्य उज्जयिनीपर्यन्तं मेघस्य यात्रानुभवं कथं भवेत् इति उपन्यस्यत ।
39. गम्भीरा नद्या:आरभ्य जाह्नवीनदीपर्यन्तं मार्गवर्णनां मेघसन्देशकाव्यं पुरस्कृत्य उपन्यस्यत ।
40. मेघसन्देशकाव्ये प्रतिपादितां पुण्यभूमिमधिकृत्य उपन्यस्यत ।
41. संस्कृतगद्यसाहित्ये कादम्बरीसंग्रहस्य प्राधान्यमधिकृत्य उपन्यस्यत।

(10X2=20)